Gyanshauryam, International Scientific Refereed Research Journal
© 2020 GISRRJ | Volume 3 | Issue 3 | ISSN : 2582-0095

# साम्प्रतिकसमाजे प्रायश्चित्तस्योपयोगिता



**डॉ. प्रीति पारेश्वरी महान्ति**

**सहाचार्या, धर्मशास्त्रविभागः,**

**राजकीयसंस्कृतमहाविद्यालयः**

**भागलपुरः, बिहारः।**

---

**सारांशः** – स्मृतिशास्त्रेषु प्रमुखोऽलोचितविषयेषु आचार-व्यवहार-प्रायश्चित्तेषु प्रायश्चित्तम् अन्यतमम्। यदि कश्चित जनः ज्ञानतोऽज्ञानतः वा कामतोऽकामतो वा गुरुं लघुं वा पापमाचरति तदर्थं सः पापतारतम्येन प्रायश्चितम् आचरेदिति सर्वैः धर्मशास्त्रकारैः प्रतिपादितम्। यद्यपि ज्ञानकृतस्य कामकृतस्य च पापस्य निष्कृतिः प्रायश्चित्तेन नैव सम्भवति, तथापि प्रायश्चितं लोकसंव्यवहारार्थं कर्त्तव्यम्। अन्यथा तज्जनः समाजे निन्दनीयः स्यात्। प्रायश्चित्तस्याचरणेन पापं क्षीयते लोकश्च प्रसीदति समाजे निन्दा न लभ्यते, अन्तरात्मा शूद्धो भवति, मनश्च निर्मलं भवति, तस्मात् पापानां प्रायश्चितम् आचरणीयम्। अतः साम्प्रतिकसमाजे तादृशः प्रायश्चित्तस्य उपयोगिताविषये मनुगौतमादिस्मृतिसूत्रादि-ग्रन्थानुसारैः मया किञ्चिदालोच्यते।

**मुख्य शब्दः** – साम्प्रतिकसमाज, प्रायश्चित्त, उपयोगिता, स्मृतिशास्त्र, संस्कार।

संस्कारस्य, श्राद्धस्याशौचस्यापि दैनन्दिनलोकोपयोगित्वात् तेषां महत्त्वमावश्यकत्वं च जगति जनानां सम्यक् विद्यते, तद्वत् प्रायश्चित्तस्यापि आवश्यकता अस्ति। मानवः स्वज्ञातसारेणाज्ञानतो वा

यानि यानि कर्माणि करोति तेषां फलं स तस्मिन्नेव जन्मनि भुङ्क्ते यदि असमाप्य म्रियते, तर्हि परजन्मनि तत्कर्माणां फलं सः अवश्यं भुङ्क्ते। सुकर्मणः फलमुत्तमं पुण्याय कल्पते। किन्तु दुष्कर्मणः फलं पापाय कल्पते। उत्तमं कर्ण कृत्वा जनः सुखेन कालम् अतिवाह्य मरणादनन्तरं स्वर्गं प्राप्नोति। कुत्सितं च कर्म कृत्वा मानवः दुःखेन कालं यापयित्वा मरणानन्तरं नरकान् भुक्त्वा तदनन्तरमपि कुत्सितयोनौ जायते। यतो हि कर्म न क्षीयते। तत्र कर्म त्रिविधं भवति- प्रारब्धं, क्रियमाणं, संचितञ्च। पूर्वजन्मनि यत् कर्माचरितं तत् प्रारब्धरूपेण इह जन्मनि भुज्यते। इह जन्मनि क्रियमाणे कर्मणि ह्यभुक्ते सति यदि जनः म्रियते, तर्हि भुक्तावशिष्टं परजन्मनि पुनर्भुज्यते, इह जन्मनि यत् कर्म सञ्चितं भवति तदपि परजन्मनि तत्फलरूपेण भुज्यते। अतः वेदधर्मशास्त्रादिषु विहितकर्मणः अनुष्ठानं निन्दितकर्मणां च वर्जनम् उपदिष्टम्। विहितस्य कर्मणः अनुष्ठानेन निन्दितस्य च कर्मणः सेवनेन नरः पतनयोग्यो भवति। प्रसङ्गेऽस्मिन् [i]गौतमेन प्रतिपादितं यत्- अथ खल्वयं पुरुषो याप्येन कर्मणा लिप्यते यथैतदयाज्ययाजनमभक्ष्यभक्षणमवद्यवदनं शिष्टस्याक्रिया प्रतिषिद्धसेवनमिति। तत्र प्रायश्चित्तं कुर्यान्न कुर्यादिति मीमांसन्ते न कुर्य्यादित्याहुः न हि कर्म क्षीयते इति। परन्तु प्रायश्चित्तकरणे पापक्षयो भवतीति शास्त्रसिद्धम्। अथ यदि कोऽपि पापी प्रायश्चित्तं नाचरन् म्रियते, तर्हि तत्परिणामस्वरूपं तामिस्रादीनेकविंशतिनरकान् प्राप्य परजन्मनि कुत्सितचिह्नयुक्तः सन् जायते, जनैश्च घृण्यो भवति। ते चैकविंशतिनरका [ii]मनुना प्रतिपादिताः यथा-

**तामिस्रमन्धतामिस्रं महारौरवरौरवौ।**
**नरकं कालसूत्रं च महानरकमेव च।।**
**संजीवनं महावीचिं तपनं सम्प्रतापनम्।**
**संहातं च सकाकोलं कुड्मलं प्रतिमूर्तिकम्।।**
**लोहशङ्कुमृजीषञ्च पन्थानं शाल्मलीं नदीम्।**
**असिपत्रवनं चैव लोहदारकमेव च।। इति।।**

ब्रह्महादिमहापातकिनः मन्वन्तरं यावदुक्तनरकेषु पर्य्यायेण पच्यन्ते। अनुपातकिनः महापातकतुल्यपातकिनः मन्वन्तरमेवोपपातकिनो गोहन्त्रादयः चतुर्युगपर्यन्तं कालम्, सङ्करीकरणकारिणः युगादिहचर्य्यात् दिव्यं वर्षसहस्रम्। जातिभ्रंशकरकर्मकारिणोऽपि अमुमेव कालं गृह्णीयुः। अपात्रीकरणकारिणोऽप्ययमेव कालः। मलिनीकरणकारिणोऽपि वर्षसहस्रम्, प्रकीर्णपापकारिणो वर्षशतं, प्रक्रमवशादुक्तेषु नरकेषु क्रमेण पच्यन्ते इति केशववैजयन्त्यां विवृताम्। ते च महापातकिनः घोरनरकेषु भयानकैर्यमदूतैः पीड्यमानस्तद्भोगानन्तरं तिर्यग्योनौ प्रपद्यन्ते विविधानि दुःखानि च प्राप्नुवन्ति। प्रसङ्गेऽस्मिन् [iii]मनुनोक्तं यत्-

**श्वसूकरखरोष्ट्राणां गोऽजाविमृगपक्षिणाम्।**

**चण्डालपुक्कसानां च ब्रह्महा योनिमृच्छति।। इति।।**

पुनश्च [iv]याज्ञवल्क्येनाऽस्मिन् विषये प्रतिपादितं यत्-

**मृग(गा)श्वसूकरोष्ट्राणां ब्रह्महा योनिमृच्छति।**

**खरपुल्कसवेनानां सुरापो नात्र संशयः।। इति।।**

एवं महतः पापस्य परिणामो यथा महान् तथा स्वल्पस्य पापस्यापि। अकृतप्रायश्चित्तो जनो भिन्नभिन्नक्षुद्रयोनौ जायते इति धर्मशास्त्रेषु प्रतिपादितम्। तद्यथा पररत्नापहारको हेमकारपक्षी, शाकं हृत्वा मयूरः, गन्धान् हृत्वा छुच्छुन्दरी, धान्यहारी मूषकः, यानहर्ता उष्ट्रः, फलहर्त्ता वानरः, जलापहरणे प्लवः, दुग्धमपहृत्य काकः, गृहोपस्करहरणे गृहकारिकीटविशेषः, मधु हृत्वा दंशः, मांसहरणे गृध्रपक्षी, गां हृत्वा गोधा, वस्त्रं हृत्वा श्वित्री, इक्ष्वादिरसापहरणे सारमेयः, लवणहारी च चीरी भूत्वा जायते। विषयेऽस्मिन् बहुभिधर्मशास्त्रकारैर्बहुधा प्रतिपादितम्। तत्र जनो यादृशं पापं करोति तत्सम्बन्धी भूत्वा पुनर्जायते इति सर्वेषामभिप्रायः। तत्रादौ महर्षिणा [v]याज्ञवल्क्येन प्रतिपादितं यत्-

**मूषको धान्यहारी स्याद्यानमुष्ट्रः कपि फलम्।**

**जलं प्लवः पयः काको गृहकारी ह्युपस्करम्।।**

**मधु दंशः पलं गृध्रो गां गोधाग्निं बकस्तथा।**

**श्वित्री वस्त्रं श्वा रसं तु चीरी लवणहारकः।। इति।।**

पुनश्च [vi] विष्णुस्मृतौ प्रसङ्गेऽस्मिन् प्रतिपादितं यत्- 1) पापात्मानो नरकेष्वनुभूतदुःखा तिर्यग्योनयो भवन्ति, 2)अतिपातकिनः पर्यायेण सर्वाः स्थावरयोनयः, 3) महापातकिनः कृमियोनयः, 4) अनुपातकिनः पक्षियोनयः, 5) उपपातकिनो जलयोनयः, 6) जातिभ्रंशकरा जलचरयोनयः, 7) सङ्करीकरणकर्माणः मृगयोनयः, 8) कृतापात्रीकरणकर्माणः पशुयोनयः, 9) कृतमलिनीकरणकर्माणः कृमिकीटादियोनयः, 10) प्रकीर्णहिंस्राः क्रव्यादा भवन्ति। एवं प्रकारेण नानादुःख नारकीययातनाश्च प्राप्य तिर्य्यग्योनौ च जन्म लब्धा कर्मक्षयानन्तरं रुजादिलक्षणयुक्ताः सन्तः पुरुषयोनौ पुनर्जायन्ते। प्रसङ्गेऽस्मिन् [vii]मनुना प्रदर्शितं यत्-

**सुवर्णचौरः कौनख्यं सुरापः श्यावदन्तताम्।**
**ब्रह्महा क्षयरोगित्वं दौश्चर्य्मं गुरुतल्पगः।।**
**पिशुनः पौतिनासिक्यां सूचकः पूतिवक्त्रताम्।**
**धान्यचौरोऽङ्गहीनत्वमातिरेक्यं तु मिश्रकः।।**
**अन्नहर्त्ताऽऽमयावित्वं मौक्यं वागपहारकः।**
**वस्त्रापहारकः श्वैत्र्यं पङ्गुतामश्वहारकः।।**
**एवं कर्म विशेषेण जायन्ते सद्विगर्हिताः।**
**जडमूकान्धवधिरा विकृताकृतयस्तथा।। इति।।**

विषयेऽस्मिन् याज्ञवलक्योऽपि मनुना सहैकमतो भवति । महापातकिनः बहूनि वर्षाणि यावत् भयङ्करान्नरकान् प्राप्य तद्भोगान्तरं दुष्कृतशेषेण श्वसूकरयोनिषु जन्म लभन्ते। ततश्च स्तेनः कुनखीः भवति, श्वीत्री भवति ब्रह्महा, सुरापः श्यावदन्तस्तु दुश्चर्मा गुरुतल्पगः।। इति [viii]वसिष्ठधर्मशास्त्रे प्रतिपादितम् ।

अस्मिन् विषये [ix]याज्ञवल्क्यस्मृतेर्मितक्षराटीकायां शङ्खवचनत्वेन दृश्यते यत्- ब्रह्महा कुष्ठी, तैजसापहारी मण्डली देवब्राह्मणाक्रोशकः खलतिः, गरदाग्निदावुन्मत्तौ, गुरुं प्रतिहन्ताऽपस्मारी,

गोघ्नश्चान्धः धर्मपत्नीं त्यक्त्वाऽन्यत्र प्रवृत्तः शब्दभेदिप्राणिविशेषः, कुण्डाशी भगभक्ष्यः, देवब्राह्मणस्वापहारी पाण्डुरोगी, न्यासापहारी काणः, स्त्रीपण्यजीवी षण्ढः, कौमारदारत्यागी दुर्भगः, मिष्टैकाशी वातगुल्मी, अभक्ष्यभक्षको गण्डमाली, ब्राह्मणीगामी निर्बीजी, क्रुरकर्मा वामनः, वस्त्रापहारी पतङ्गः, शय्यापहारी क्षपणकः, दीपापहारी कौशिकः, मित्रध्रुक् क्षयी, मातापित्रोराक्रोशकः खञ्जकः इति। ततश्च तत्रैव गौतमवचनत्वेन दृश्यते यत्-अनृतवाग् गुग्वलः, दारत्यागी जलोदरी, कूटसाक्षी श्लीपदी, विवाहबिघ्नकर्त्ता छिन्नोष्ठः, मातृघ्नोऽन्धः, स्नुषागामी वातवृषणः, चतुष्पथे विण्मूत्रविसर्जकः मूत्रकृच्छ्री, कन्यादूषकः षण्ढः, ईर्ष्यालुर्मशकः, पित्रा विवदमानोऽपस्मारी, न्यासापहारी अनपत्यः, रत्नापहारी अत्यन्तं दरिद्रः, विद्याविक्रयी पुरुषमृगः, वेदविक्रयी द्विपः, बहुयाजको जलप्लवः, अयाज्ययाजको वराहः, अनिमन्त्रितभोजी वायसः, मिष्टैकभोजी वानरः, यतस्ततोऽश्नन्मार्जरः, कक्षवनदहनोत्सादी मण्डलकुष्ठी, शुद्राचार्य्यः श्वपाकः, गोहर्त्ता सर्पः, स्नेहापहारी क्षयी, अन्नापहारी अजीर्णी, ज्ञानापहारी मूकः, चण्डालीपुक्कसीगन्ता अजगरः, प्रव्रजितागमने मरुपिशाचः, शूद्रीगमने दीर्घकीटः, सवर्णाभिगामी दरिद्रः, जलहारी मत्स्यः, क्षीरहारी बलाकः, वार्धुषिकः, अङ्गहीनः, अविक्रेयविक्रयी गृध्रः, राजमहिषीगामी नपुंसकः, राजक्रोशको गर्दभः, गोगामी मण्डूकः, अनध्यायाध्ययने शृगालः, परद्रव्यापहारी परप्रेष्यः, मत्सयवधे गर्भवासी, इत्येतेऽनूर्ध्वगमनाः इति। यदि असौ जनः पापं कृत्वापि प्रायश्चितं न कुर्यात्, मरणादन्तरं नरके पतित। ततश्च कुत्सितलक्षणयुक्तः सन् संसारमायाति निन्दां च प्राप्नोति। यावत् सः जीवितो भवति प्रायश्चित्तस्याकरणात् लोकसंव्यहारयोग्योऽपि न भवति। तस्मात्समाजे तस्य स्थानं घृण्यं दयनीयं च भवति। अतः यदि कश्चित ज्ञानतोऽज्ञानतः वा कामतोऽकामतो वा गुरुं लघुं वा पापमाचरति तदर्थं सः पापतारतम्येन प्रायश्चितम् आचरेदिति सर्वैः मन्वादिस्मृतिकारैः गौतमादिसुत्रकारैः च प्रतिपादितम्। यद्यपि

ज्ञानकृतस्य कामकृतस्य च पापस्य निष्कृतिः नास्ति इति याज्ञवल्क्येन प्रतिपादितं, तथापि प्रायश्चितं लोकसंव्यवहारार्थं कर्त्तव्यम्। अन्यथा सः समाजे निन्दनीयः स्यात्, यदि अकामतः अज्ञानतो वा किंचित् पापम् आचरितम् तस्य परिणतिररूपं नरकादिकं मरणानन्तरं मा भूदिति हेतोः प्रायश्चित्तमाचरणीयम्। प्रायश्चित्तस्याचरणेन पापं क्षीयते लोकश्च प्रसीदति समाजे निन्दा न लभ्यते, अन्तरात्मा शूद्धो भवति, मनश्च निर्मलं भवति, तस्मात् पापानां प्रायश्चितम् आचरणीयम्। यदि पापकृत् कश्चिद् दुष्टः धुर्त्तो वा तर्हि स राज्ञापि दण्ड्यो भवति। राजदण्डं लब्ध्वापि सः निष्पापो न भवति। तस्मात् तस्य प्रायश्चित्तमावश्यकम्। यस्य च पापं न केनापि दुष्टं ज्ञातं वा तस्य साक्ष्यादिप्रमाणाभावात् राजदण्डाभावेऽपि पापाभावः इति न मन्तव्यम्। राजदण्डेन पापाक्षयाभावात् धर्मशास्त्रकारैः प्रच्छन्नपापानां कृते रहस्यप्रायश्चित्तानां विधानवयवस्था विहिता। तादृशैः कर्मभिरपि पापानाम् अपनोदनं भवति। अतो यदा मनुष्यः याप्येन कर्मणा लिप्यते, तदा अन्तर्गतं कल्मषं क्षालयितुं काले प्रायश्चितत्स्य व्यवस्था विहिताऽस्ति। या व्यवस्था मानवशुद्धत्वाद् परब्रह्मणि लीनं कर्त्तुं शक्नुयात्। अतः पापात् निवृर्त्यर्थं समाजे च शुद्धं शान्तं निष्कलङ्कं जीवनं यापयितुं प्रायश्चित्तानाम् आवश्यकता वर्त्तते, यथा व्यवस्थाया अशुभानां मलानां विनाशेन सह ब्रह्मसाक्षात्कारः कर्त्तुं शक्यते। अतः प्रायश्चित्तेन एतत्कर्म संपादयितुं शक्यते इति हेतोः प्रायश्चित्तानाम् इदमेव महत्वम् । मनुष्याणां कृते च सर्वासु अवस्थासु सर्वेषु कालेषु च शुद्धजीवननिर्वाहार्थं प्रायश्चित्तानामावश्यकता सुतरां विद्यते।

## पादटिप्पणी

[i].गौतमधर्मसूत्रम् – 3-1-2-4
[ii].मनुस्मृतिः – 4/88-90
[iii].मनुस्मृतिः – 12-55
[iv].याज्ञवल्क्यस्मृतिः – 3-207

[v].याज्ञवल्क्यस्मृतिः – 3-214

[vi].विष्णुस्मृतिः – 44/1-10

[vii].मनुस्मृतिः – 11/49-52

[viii].वासिष्ठधर्मशास्त्रम् – 20-44

[ix].याज्ञ.मिताक्षरा पृष्ठा – 415-416

## सन्दर्भग्रन्थसूची


गौतमधर्मसूत्रम् – हरदत्तकृतः मिताक्षरासहिता, चौखम्बा संस्कृत सिरिज्, वाराणसी, 1966.

मनुस्मृतिः – मन्वर्थमुक्तावलीसहिता, मोतिलाल वनारसीदास, दिल्ली, 1990

याज्ञवल्क्यस्मृतिः – मिताक्षराटीका सहिता, डा. गङ्गासागरराय सम्पादित, चौखम्बासंस्कृतप्रतिष्ठानम्, दिल्ली।

वासिष्ठधर्मशास्त्रम् – इन्दोलजिकल वुक हाउस, वाराणसी, 1983

विष्णुस्मृतिः – चौखम्बा संस्कृतसिरीज अफिस, वाराणसी, 1962